Click here to go back

Shukra Asttottara Shatanaama Stotram - Hindi

|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

## अथ शुक्राष्टोत्तर शतनाम स्तोत्रं

शुक्रश्शुचिश्शुभगुणो शुभदो शुभलक्षणः। शोभनाक्ष श्शुभ्ररूपः शुद्धस्फटिक भास्वरः॥ दीनार्तिहारको दैत्यगुरुर्देवाभिवंदितः। काव्यासक्तः कामपालः कविः कल्याणदायकः॥ भद्रमूर्तिर्भद्रगुणो भार्गवो भक्तपालनः। भोगदो भुवनाध्यक्षो भुक्तिमुक्तिफलप्रदः॥ चारुशीलश्चारुरूपश्चारुचंद्रनिभाननः। निधिर्निखिलशास्त्रज्ञो नीतिविद्याधुरंधरः॥ सर्वलक्षण संपन्नस्सर्वापगुण वर्जितः। समानाधिक निर्मुक्तस्सकलागम पारगः॥ भृगर्भोगकरो भूमिसुरपालन तत्वरः। मनस्वी मानदो मान्यो मायातीतो महाशय॥ बलिप्रसन्नो अभयदो बली बलपराक्रमः। भवपाश परित्यागो बलिबंध विमोचकः॥ घनाशयो घनाध्यक्शो कंबुग्रीवो कळाधराय नमः। कारुण्यरस संपूर्णो कल्याणगुण वर्धनः॥ ओं श्वेतांबरो श्वेतवपुष्चतुर्भुज समन्वितः। अक्षमालाधरो अचिंत्यो अक्षीणगुण भासुरः॥ नक्षत्रगण संचारो नयदो नीतिमार्गदः। हर्षप्रदो हृषीकेशो क्लेशनाशको कविः॥ चिंतितार्थप्रदो शांतिमतिश्चित्तसमाधिकृत्। अधिव्याधिहरो भूरिविक्रमो पुण्यदायकः॥ पुराणपुरुषो पूज्यो पुरुहूतादि सन्नुतः। अजेयो विजितारातिर्विविधाभरणोज्वलः॥ कुंदपुष्प प्रतीकाशो मंदहासो महामतिः। मुक्ताफल समानाभो मुक्तिदो मुनिसन्नुतः॥ रत्नसिंहासनारूढो रथस्थो रजतप्रभः। सूर्यप्राग्देश संचार स्सुरशत्रु सुहृत्कविः॥ तुलावृषभ राशीशो दुर्धरो धर्मपालः। भाग्यदो भव्यचारित्रो भवपाश विमोचकः॥ गौडदेशेश्वरो गोप्ता गुणी गुणविभूषणः। ज्येष्ठानक्षत्र संभूतो ज्येष्ठश्रेष्ठश्शुचिस्मितः॥ अपवर्गप्रदो अनंतो संतानफल दायकः। सर्वैश्वर्यप्रदस्सर्व गीर्वाण गणसन्नुतः॥ इति शुक्राष्टोत्तर शतनामस्तोत्रं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back